# अथ लग्न सङ्कल्पः

ॐ विष्णुर्विष्णुर्विष्णुः॥ ॐ स्वस्ति श्रीमन्मुकुन्द सच्चिदानन्दस्याज्ञया प्रवर्तमानस्य अद्य श्रीब्राह्मणोऽह्नि द्वितीय परार्द्धे विष्णुपदे श्रीश्वेत वराहाकल्पे स्वाम्भुवादि मन्वन्तराणां मध्ये सप्तमे वैवस्वतमन्वन्तरे कृत त्रेता द्वापर कलिसंज्ञायां चतुर्युगानां मध्ये वर्त्तमाने अष्टाविंशतितमे कलियुगे तत्प्रथम चरणे तथा पञ्चाशत्कोटि योजन विस्तीर्ण भूमण्डलान्तर्गत सप्तद्वीप मध्ये जम्बूद्वीपे तत्रापि श्रीगङ्गा यमुना – सरयु – नर्मदा पार्वती व्यासादिसरिद्भिः पाविते परमपवित्रे भारतवर्षे आर्यावर्तान्तर्गत काशी कुरूक्षेत्र पुष्कर प्रयाग विजली महादेव खीरगंङ्गा वशिष्ट मनीकर्णादि नानातीर्थ युक्त कर्म भूमौ पुण्य क्षेत्रे हिमवत्पर्वतैक दिग्भागे हिमाचल प्रदेशे .........जनपदे तत्जनपदान्तर्गते .........नामनि ग्रामे ..........अधिष्ठित क्षेत्रे गृह कुलदेव ब्राह्मणानां तत्सन्निधौ .........उपकण्ठे श्रीमन्नृपतिवीर विक्रमादित्य राज्यात् प्रभवादिषष्ठि सम्वत्सराणां मध्ये ..........नाम्नि सम्वत्सरे ..........अयने ...............ऋतौ मासोत्तमेमासे .........मासे ..........पक्षे .........तिथौ .........वासरे यथा शक लग्न मुहूर्त नक्षत्र योग करणान्वित ..............राशि स्थिते सूर्ये शेषेषु ग्रहेषु यथायथाराशि स्थानस्थितेषु सत्सु एवं ग्रह गुण गण विष्टेऽस्मिन् शुभ मुहूर्ते शुभ पुण्य तिथौ ........गोत्रोत्पन्न .........शर्म्मा सपत्नीकः

# शाखोच्चार

## वरपक्षीय प्रथम शाखोच्चार

पठनीय वेदमन्त्र- ॐ गणानान्त्वा गणपतिꣳ हवामहे प्रियाणान्त्वा प्रियपतिꣳ हवामहे निधीनान्त्वा निधिपतिꣳ हवामहे वसो मम। आहमजानि गर्भधमा त्वमजासि गर्भधम्॥

मङ्गल श्लोकः-

गौरीनन्दनगौरवर्णवदनः शृङ्गारलम्बोदरः
सिन्दूरार्चितदिग्गजेन्द्रवदनः पादौ रन्नूपुरौ।
कर्णौ लम्बविलम्बिगण्डविलसत्कण्ठे च मुक्तावली
श्रीविघ्नेश्वरविघ्नभञ्जनकरो देयात्सदा मङ्गलम्॥

गोत्रोच्चार

अस्यां रात्रौ (अस्मिन् दिवसे) अस्मिन् मङ्गल मण्डपाभ्यन्तरे स्वस्ति श्रीमन्नन्द नन्दन चरणकमल भक्ति विद्या विनीत निज कुलकमल कलिका प्रकाशक भास्कर सदाचार सच्चरित सत्कुल सत्प्रतिष्ठा गरिष्ठस्य श्रीमद्विविध विद्या विचार चातुरी विनिर्जित सकलवादि वृन्दोपरि विराजमान-पद पदार्थ- साहित्य रचना अमृतायमान-काव्य कौतुक चमत्कार परिणत निसर्ग सुन्दर सहजानुभाव गुणनिकर गुम्फितयशः सुरभीकृत मङ्गल मण्डपस्य स्वस्ति शुक्ल यजुर्वेदऽन्तर्गत........गोत्रस्य........प्रवरस्य.......वेदिनः .......शाखाध्येतुः ........सूत्रस्य श्रीमतः ........(परदादा).......शर्मणः प्रपौत्रः, श्रीमतः .........(दादा)........ शर्मणः पौत्रः, श्रीमतः .......... (पिता).......शर्मणः ............(वर)............नाम्ने पुत्रः प्रयतपाणिः शरणं प्रपद्ये, स्वस्ति संवादेषू भयोर्वृद्धिः वर-कन्ययोर्मङ्गलमास्तां भूयास्ताम्, वरश्चिरञ्जीवी भवतात्, कन्या च सावित्री भूयात्। कन्या सौभाग्यवती भवतु दीर्घायुर्भवतु वरः॥

श्रीमन्न किं गोत्रस्य किं प्रवरस्य किं वेदाध्यायिनः किं शाखिनः किं सूत्रस्य किं प्रपौत्रीं किं पौत्रीं किं पुत्रीं किं नाम्नी कन्यां?

# कन्यापक्षीय प्रथम शाखोच्चार

पठनीय वेदमन्त्रः — ॐ पुनस्त्वाऽऽदित्या रुद्रा वसवः समिन्धतां पुनर्ब्रह्माणो वसुनीथ यज्ञैः। घृतेन त्वं तन्वं वर्धयस्व सत्याः सन्तु यजमानस्य कामाः॥

मंगलश्लोक —

ईशानो गिरिशो मृडः पशुपतिः शूली शिवः शङ्करो
भूतेशः प्रमथाधिपः स्मरहरो मृत्युञ्जयो धूर्जटिः।
श्रीकण्ठो वृषभध्वजो हरभवो गङ्गाधरस्त्र्यम्बकः
श्रीरुद्रः सुरवृन्दवन्दितपदः कुर्यात् सदा मङ्गलम्॥

शाखोच्चार—

अस्यां रात्रौ (अस्मिन् दिवसे) अस्मिन् मङ्गल मण्डपाभ्यन्तरे स्वस्ति श्रीमद्विविध विद्यालङ्कार शरद्विमल रोहिणी रमणीयोदार सुन्दर दामोदर मकरन्द वृन्द शेखर प्रचण्ड खण्ड मण्डलपूर्ण पुरीन्दु नन्दन चरण कमलभक्ति तदुपरि महानुभाव सकल विद्या विनीत निज कुल कमल कलिका प्रकाशनक-भास्कर सदाचार सच्चरित्र सत्कुल सत्प्रतिष्ठा श्रेष्ठ विशिष्ट-वरिष्ठस्य स्वस्ति शुक्ल यजुर्वेदऽन्तर्गत..... ............गोत्रस्य..........प्रवरस्य..........वेदिनः ...........शाखाध्येतुः ............सूत्रस्य श्रीमतः ..........(परदादा) ...........शर्मणः प्रपौत्री, श्रीमतः.........................(दादा).........................शर्मणः पौत्री, श्रीमतः..............(पिता)..............शर्मणः.......................नाम्नि पुत्रीयम् प्रयतपाणिः शरणं प्रपद्ये, स्वस्ति संवादेषू भयोर्वृद्धिः वर कन्ययोर्मङ्गलमास्तां भूयास्ताम्, वरश्चिरञ्जीवी भवतात्, कन्या च सावित्री भूयात्। कन्या सौभाग्यवती भवतु दीर्घायुर्भवतु वरः॥

श्रीमन्न किं गोत्रस्य किं प्रवरस्य किं वेदाध्यायिनः किं शाखिनः किं सूत्रस्य किं प्रपौत्राय किं पौत्राय किं पुत्राय किं नाम्ने वराय?

# वरपक्षीय द्वितीय गोत्रोच्चार

पठनीय वेदमन्त्र :- यथेमां वाचं कल्याणीमावदानि जनेभ्यः। ब्रह्म-राजन्याभ्याꣳ शूद्राय चार्याय च चारणाय च। प्रियो देवानां दक्षिणायै दातुरिह भूयासमयं मे कामः समुध्यतामुप मादो नमतु ॥

मङ्गलश्लोक :-

कौपीनं परिधाय पन्नगपते गौरीपतिः श्रीपते-
रभ्यर्णं समुपागते कमलया सार्धं स्थितमस्यासने।
आयाते गरुडेऽथ पन्नगपतौ त्रासाद्बहिर्निर्गते
शम्भुं वीक्ष्य दिगम्बरं जलभुवः स्मेरं शिवं पातु वः ॥

गोत्रोच्चार -

अस्यां रात्रौ (अस्मिन् दिवसे) अस्मिन् मङ्गल मण्डपाभ्यन्तरे स्वस्ति श्रीमन्नन्द नन्दन चरणकमल भक्ति विद्या विनीत निज कुलकमल कलिका प्रकाशक भास्कर सदाचार सच्चरित सत्कुल सत्प्रतिष्ठा गरिष्ठस्य श्रीमद्विविध विद्या विचार चातुरी विनिर्जित सकलवादि वृन्दोपरि विराजमान-पद पदार्थ- साहित्य रचना अमृतायमान-काव्य कौतुक चमत्कार परिणत निसर्ग सुन्दर सहजानुभाव गुणनिकर गुम्फितयशः सुरभीकृत मङ्गल मण्डपस्य स्वस्ति शुक्ल यजुर्वेदऽन्तर्गत........गोत्रस्य........प्रवरस्य.......वेदिनः .......शाखाध्येतुः ........सूत्रस्य श्रीमतः ........(परदादा).......शर्मणः प्रपौत्रः, श्रीमतः .........(दादा)........ शर्मणः पौत्रः, श्रीमतः .......... (पिता).......शर्मणः ............(वर).............नाम्ने पुत्रः प्रयतपाणिः शरणं प्रपद्ये, स्वस्ति संवादेषू भयोर्वृद्धिः वर-कन्ययोर्मङ्गलमास्तां भूयास्ताम्, वरश्चिरञ्जीवी भवतात्, कन्या च सावित्री भूयात्। कन्या सौभाग्यवती भवतु दीर्घायुर्भवतु वरः ॥

श्रीमन्न किं गोत्रस्य किं प्रवरस्य किं वेदाध्यायिनः किं शाखिनः किं सूत्रस्य किं प्रपौत्रीं किं पौत्रीं किं पुत्रीं किं नाम्नी कन्यां ?

# कन्यापक्षीय द्वितीय शाखोच्चार

पठनीय वेद मन्त्र–

आयुष्यं वर्चस्यꣳ रायस्पोषमौद्भिदम्।
इदꣳ हिरण्यं वर्चस्वज्जैत्रायाविशतादु माम्॥

मंगल श्लोक—

कौसल्याविशदालवालजनितः सीतालतालिङ्गितः
सिक्तः पंक्तिरथेन सोदरमहाशाखादिभिर्वर्धितः।
रक्षस्तीव्रनिदाघपाटनपटुश्छायाश्रितानन्दकृद्
युष्माकं स विभूतयेऽस्तु भगवान् श्रीराम कल्पद्रुमः॥

शाखोच्चार —

अस्यां रात्रौ (अस्मिन् दिवसे) अस्मिन् मङ्गल मण्डपाभ्यन्तरे स्वस्ति श्रीमद्विविध विद्यालङ्कार शरद्विमल रोहिणी रमणीयोदार सुन्दर दामोदर मकरन्द वृन्द शेखर प्रचण्ड खण्ड मण्डलपूर्ण पुरीन्दु नन्दन चरण कमलभक्ति तदुपरि महानुभाव सकल विद्या विनीत निज कुल कमल कलिका प्रकाशनक–भास्कर सदाचार सच्चरित्र सत्कुल सत्प्रतिष्ठा श्रेष्ठ विशिष्ट–वरिष्ठस्य स्वस्ति शुक्ल यजुर्वेदऽन्तर्गत..... ............गोत्रस्य.........प्रवरस्य.........वेदिनः ..........शाखाध्येतुः ............सूत्रस्य श्रीमतः ..........(परदादा) ...........शर्मणः प्रपौत्री, श्रीमतः........................(दादा)........................शर्मणः पौत्री, श्रीमतः..............(पिता).............शर्मणः......................नाम्नि पुत्रीयम् प्रयतपाणिः शरणं प्रपद्ये, स्वस्ति संवादेषू भयोर्वृद्धिः वर कन्ययोर्मङ्गलमास्तां भूयास्ताम्, वरश्चिरञ्जीवी भवतात्, कन्या च सावित्री भूयात्। कन्या सौभाग्यवती भवतु दीर्घायुर्भवतु वरः॥

श्रीमन्न किं गोत्रस्य किं प्रवरस्य किं वेदाध्यायिनः किं शाखिनः किं सूत्रस्य किं प्रपौत्राय किं पौत्राय किं पुत्राय किं नाम्ने वराय?

# वरपक्षीय तृतीया शाखोच्चार

पठनीय वेद मन्त्र– यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति।
दूरङ्गमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसङ्कल्पमस्तु ॥

मंगल श्लोक –

देवक्यां यस्य सूतिस्त्रिजगति विदिता रुक्मिणी धर्मपत्नी
पुत्राः प्रद्युम्नमुख्याः सुरनरजयिनो वाहनः पक्षीराजः।
वृन्दारण्यं विहारो व्रजपुरवनिता वल्लभा राधिकाद्या–
श्चक्रं विख्यातमस्त्रं स जयति जगतां स्वस्तये नन्दसूनुः ॥

शाखोच्चार –

अस्यां रात्रौ (अस्मिन् दिवसे) अस्मिन् मङ्गल मण्डपाभ्यन्तरे स्वस्ति श्रीमन्नन्द नन्दन चरणकमल भक्ति विद्या विनीत निज कुलकमल कलिका प्रकाशक भास्कर सदाचार सच्चरित सत्कुल सत्प्रतिष्ठा गरिष्ठस्य श्रीमद्विविध विद्या विचार चातुरी विनिर्जित सकलवादि वृन्दोपरि विराजमान–पद पदार्थ– साहित्य रचना अमृतायमान–काव्य कौतुक चमत्कार परिणत निसर्ग सुन्दर सहजानुभाव गुणनिकर गुम्फितयशः सुरभीकृत मङ्गल मण्डपस्य स्वस्ति शुक्ल यजुर्वेदऽन्तर्गत........गोत्रस्य........प्रवरस्य.......वेदिनः .......शाखाध्येतुः ........सूत्रस्य श्रीमतः ........(परदादा).......शर्मणः प्रपौत्रः, श्रीमतः .........(दादा)........ शर्मणः पौत्रः, श्रीमतः .......... (पिता).......शर्मणः ............(वर)............नाम्ने पुत्रः प्रयतपाणिः शरणं प्रपद्ये, स्वस्ति संवादेषू भयोर्वृद्धिः वर–कन्ययोर्मङ्गलमास्तां भूयास्ताम्, वरश्चिरञ्जीवी भवतात्, कन्या च सावित्री भूयात्। कन्या सौभाग्यवती भवतु दीर्घायुर्भवतु वरः ॥

श्रीमन्न किं गोत्रस्य किं प्रवरस्य किं वेदाध्यायिनः किं शाखिनः किं सूत्रस्य किं प्रपौत्रीं किं पौत्रीं किं पुत्रीं किं नाम्नी कन्यां?

# कन्यापक्षीय तृतीया शाखोच्चार

पठनीय वेद मन्त्र–

ब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेन आवः।
स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च वि वः॥

मंगल श्लोक —

अगुल्या कः कपाटं प्रहरति कुटिले माधवः किं वसन्तो
नो चक्री किं कुलालो नहि धरणीधरः किं द्विजिह्वः फणीन्द्र।
नाहं घोराहि मर्दी किमुत खगपतिर्नो हरिः किं कपीन्द्रः
चेत्थं राधावचोभिः प्रहसितवदनः पातु वश्चक्रपाणिः॥

शाखोच्चार —

अस्यां रात्रौ (अस्मिन् दिवसे) अस्मिन् मङ्गल मण्डपाभ्यन्तरे स्वस्ति श्रीमद्विविध विद्यालङ्कार शरद्विमल रोहिणी रमणीयोदार सुन्दर दामोदर मकरन्द वृन्द शेखर प्रचण्ड खण्ड मण्डलपूर्ण पुरीन्दु नन्दन चरण कमलभक्ति तदुपरि महानुभाव सकल विद्या विनीत निज कुल कमल कलिका प्रकाशनक–भास्कर सदाचार सच्चरित्र सत्कुल सत्प्रतिष्ठा श्रेष्ठ विशिष्ट–वरिष्ठस्य स्वस्ति शुक्ल यजुर्वेदऽन्तर्गत..... ............गोत्रस्य..........प्रवरस्य..........वेदिनः ...........शाखाध्येतुः ............सूत्रस्य श्रीमतः ..........(परदादा) ...........शर्मणः प्रपौत्री, श्रीमतः........................(दादा)........................शर्मणः पौत्री, श्रीमतः..............(पिता)..............शर्मणः.......................नाम्नि पुत्रीयम् प्रयतपाणिः शरणं प्रपद्ये, स्वस्ति संवादेषू भयोर्वृद्धिः वर कन्ययोर्मङ्गलमास्तां भूयास्ताम्, वरश्चिरञ्जीवी भवतात्, कन्या च सावित्री भूयात्। कन्या सौभाग्यवती भवतु दीर्घायुर्भवतु वरः॥

# अथ शेष सङ्कल्पः

---------- मम समस्त पितृणां निरतिशय सानन्द ब्रह्म लोकावाप्तयादि कन्यादान कल्पोक्त फलावाप्तये अनेन वरेणा अस्यां कन्यायामुत्पादयिष्यमाण सन्तत्या दश पूर्वान् पुरुषान् दशापरान् पवित्रि कर्तुमात्मनश्च लक्ष्मी नारायण प्रीतये देवाग्नि गुरुबन्धु ब्राह्मणादि सन्निधौ ...... ......गोत्राय .........प्रवराय .........वेदिने .........शाखिने .......सूत्रिण .........जातये...........शर्म्मणे .........राशि वराय आयुष्मते श्रीधर रूपिणे कन्यार्थिने ...........गोत्रां ......प्रवरां ........वेदिनां ..........शाखिने..........सूत्रिणां .....जातये आयुष्मतीं श्रीरूपिणीं वरार्थिनीं .........नाम्नीं इमां कन्या यथाशक्ति विविध भूषणादिभिलंकृता माङ्गलिक वस्त्र वेष्टितां प्रजापति दैवतकां ब्राह्मविवाह दीक्षया दीक्षतां सहधर्माचरणाय वायुरग्निादि साक्षिकतया पत्नीत्वेन तुभ्यमहं सम्प्रददे ॥